National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(25): 123-127
© 2019 NJHSR
www.sanskritarticle.com

**Pradip Mandal**
Master of Arts,
Rabindra Bharati University,
Kolkata

**Correspondence:**
**Pradip Mandal**
Master of Arts,
Rabindra Bharati University,
Kolkata

# व्याकरणशास्त्रस्य अष्टदश प्रयोजनानि-अध्ययनमेकम्

**Pradip Mandal**

**पुराणन्यायमीमांसा धर्मशास्त्रागमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।** (1/3)

अर्थात् ऋग्वेदादिचतुर्वेदाः, शिक्षा-कल्प-व्याकरणादि षड्वेदाङ्गानि पुराण-न्यायादिचतुःशास्त्राणि चैवम्प्रकारेण याज्ञवल्क्यसंहितायांचतुर्दशविद्या स्थानानि उक्तानि। कुत्रापि अष्टदशविद्यास्थानानि उक्तानि। यथा, विष्णुपुराणे याज्ञवल्क्यकथित-चतुर्दशविद्यास्थानैः सह आयुर्वेद- धनुर्वेद- गान्धर्ववेद- अर्थशास्त्राणिचोक्तानि। कुत्रापि वा पुनः विद्यास्थानानां भिन्नता अपि दृश्यते। तेषु विद्यास्थातेषु व्याकरणशस्त्रस्य एकं विशेषस्थानं वर्तते। अस्य शास्त्रस्य च भूयसी प्रशस्तिः दरीदृश्यते विविधग्रन्थे शास्त्रे च। यथा- छान्दोग्योपनिषदि व्याकरणमुच्यते- 'वेदानां वेदः' (7/1/5), पाणिनीयशिक्षायां व्याकरणं वेदपुरुषस्य मुखरूपेण कल्पित्वा उक्तम्- 'मुखं व्याकरणं स्मृतम्', महाभाष्ये उक्तम्- 'प्रधानं षट्स्वङ्गेषु व्याकरणम्', सर्ववेदपारिषदं हीदं शास्त्रम्', ध्वन्यालोकवृत्तो आनन्दवर्धनः निगदितवान्- प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्, काव्यमीमांसायाम् आलंकारिकेन राजशेखरेणापि उक्तम्- "शब्दविद्येव विद्यानां मध्ये जज्वाल रुक्मिणी"। इत्येवं वहुप्रकाराः प्रशस्तयः उपश्रुत्य संस्कृतवाङ्मये व्याकरणशास्त्रस्य यदेकं महत् अवदानं वर्तते तत् सुस्पष्टरूपेण प्रतीयते। (6/4/7/3)। व्याकरणशब्दस्य व्यत्पत्तिगतार्थमस्ति- व्याक्रियन्ते शब्दाः अनेन इति व्याकरणम्' अथवा व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति शब्दज्ञानजनकं व्याकरणम्। वि - आ + कृ + ल्यु = अनट् इत्येवं व्युत्पत्तिः व्युत्पत्तिगतार्थानुसारं वा वक्तुं शक्यते यत्, संस्कृतवाङ्मये प्रयुक्तानां शब्दानां शुद्धाशुद्धयोः विचारः येन शास्त्रेण क्रियते तद्धि व्याकरणम्। व्याकरणस्य केन उपायेन व्याक्रियते शब्दान्? पतञ्जलिना उक्तम्-- "न हि शब्देन किञ्चिद् व्याक्रियते। केन तर्हि। सूत्रेण।।... सूत्रत एव हि शब्दान् प्रतिपद्यन्ते"। अर्थात् व्याकरणस्य सूत्रेण हि शब्दानां शुद्धाशुद्धयोः विचारः क्रियते। एतदर्थं वार्तिककारेण कात्यायनेन प्रोक्तम्- "लक्ष्यलक्षणे व्याकरणम्"। किं लक्ष्यं किं वा लक्षणम्? साधुशब्दस्य ज्ञानं व्याकरणशास्त्रास्य साक्षात् प्रयोजनत्वादेव साधुशब्द उत शब्दोऽस्ति लक्ष्यः।लक्ष्यमिदञ्च शब्दं सूत्रेण ज्ञायते इति सूत्रमस्ति लक्षणम्। सामान्यतः काञ्चित् भाषां शुद्धरूपेण वक्तुं लेखितुं च यः उपायः गृह्यते तं व्याकरणमुच्यते (Grammar is the art of speaking and writing the language correctly)। अत एव व्याकरणेन ध्वनिविवेचनम्, शब्दविवेचनम्, अर्थविवेचनं तथा वाक्यविवेचनं क्रियते।शुद्धोच्चारणं, शुद्धप्रयोगः, अर्थज्ञानम्, अनुवादः, शब्द-भाण्डारम् इत्येवं वहुविध प्रयोजनस्य कृते अस्माभिः व्याकरणं पठनीयम्। प्रयोजनमस्ति अनुबन्धचतुष्टयस्य मध्ये एकम्। "तत्र अनुवन्धो नाम- अधिकारि-विषय-सम्बन्ध-प्रयोजनानि" (वेदान्तसारः)। वस्तुतः यत् किमपि शास्त्रं सम्यक् ज्ञातुम् अनुवन्धचतुष्टयस्य माहत्म्यम् अवश्यस्वीकार्याम्। श्लोकवार्तिकस्य प्रथमैव अनुवन्धचतुष्टयस्य मध्ये प्रयोजनम् सर्वाधिकं महत्त्वं प्रदत्तं कुमारिलभट्टेन—

**"यावत् सर्वस्येव शास्त्रस्य कर्मणो वापि कस्यचित्।**
**यावत् प्रयोजनं नोक्तं तावत्तत् केन गृह्यते।।"**(श्लो. वा. 1/12)

अत एव यस्य कस्यचित् शास्त्रस्य प्रयोजनं ज्ञातुं सर्वप्रथमं कर्तव्यम्। यतो हि लक्ष्यते यत्, इह जगति अतीव मन्दवुद्धेः पुरुषस्यापि निष्प्रयोजने कस्मिंश्चित् कार्ये प्रवृत्तिः न दृश्यते। तदुक्तम्- "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते" इति। व्याकरणशास्त्रम् षट्सु वेदाङ्गेषु गण्यते। वेदार्थपरिज्ञानाय अङ्गमिदं परमावश्यकम्। सूत्रकृता पाणिनिमुनिना नोक्तं अस्य व्याकरण शास्त्रस्य किमपि प्रयोजनम्। किन्तु लौकिकनियमत्वात् वार्तिकारम्भे भगवता कात्यायनेन वररुचिना वा व्याकरणस्य पञ्च प्रयोजनानि उक्तानि, तानि सन्ति- 1. रक्षा, 2. ऊहः 3. आगमः, 4. लघुः, 5. असन्देहः चेति। तथाहि- 'रक्षोहागमलध्वसन्देहाः प्रयोजनम्" इति। एतानि पञ्चविधानि प्रयोजनानि सन्ति व्याकरणशास्त्रस्य मुख्यप्रयोजनानि। वस्तुतः असाधुशब्देभ्यः साधुशब्दज्ञानं हि शब्दानुशासनस्य व्याकरणस्य वा साक्षत्प्रयोजनम्। तदुक्तं भाष्यकारेण 'अथ शब्दानुशासनम्' इति वाक्येन। पुनः साधुशब्दज्ञानस्य प्रयोजनमस्ति रक्षा दीनि पञ्च प्रयोजनानि। कैयटकृते महाभाष्यप्रदीपे तदुक्तम्- "भाष्यकारो विवरणकारत्वात् व्याकरणस्य साक्षात्प्रयोजनमाह- अथ शब्दानुशासनमिति। प्रयोजनप्रयोजनानि तु रक्षोहादीनि...।"

अपिच वर्तन्ते भगवत्पतञ्जलिना उक्तानि त्रयोदश गौणप्रयोजनानि, तानि यथाक्रमम्-- (1)तेऽसुराः, (2) दुष्टः शब्दः, (3) यदधीतम्, (4) यस्तु प्रयुङ्क्ते, (5) अविद्वांसः, (6) विभक्तिं कुर्वन्ति, (7) यो वा इमाम, (8) चत्वारि, (9) उत त्वः, (10) सक्तुमिव, (11) सारस्वतीम्, (12) दशम्यां पुत्रस्य, (13) सदेवोऽसि वरुण चेति। इमानि त्रयोदश प्रयोजनानि सन्ति शब्दानुशासनस्य आनुषङ्कि-प्रयोजनानि गौणप्रयोजनानि वा। अतएव मुख्य-गौणमिलितत्वेन व्याकरणशास्त्रस्य समुदायेन अष्टदश प्रयोजनानि द्रष्टुं समुपलभ्यन्ते। अधुना तत्प्रयोजनानि यथाक्रमं प्रतिपाद्यन्ते-

**1. रक्षा (preservation of the Vedas)** रक्षा (वेदसंरक्षणम्) हि व्याकरणशास्त्रस्य प्रथमं मुख्यप्रयोजनम्। सामान्यतः वैदिक-लौकिकभेदेन संस्कृतभाषा द्विविधा। एतदर्थं वैदिक-लौकिकसंस्कृतयोर्मध्ये बहवः प्रमुखाः भेदाः दृश्यन्ते। यथा-- लौकिके ग्रह्-धातोः लटः उत्तमपुरुषस्य एकवचने गृह्णामि स्यात्। किन्तु वेदे 'गृभ्णामि' (वर्णविकारः) इत्थमपि लक्ष्यते। लौकिके 'आत्मना' पदस्य स्थाने वेदे 'त्मना' (लोपः) शब्दस्य प्रयोगः परिलक्ष्यते। पुनः लौकिके 'देवाः' इति शब्दस्य स्थले वेदे 'देवासः' (आगमः) ईदृशः प्रयोगोऽपि दृश्यते। अनेन प्रकारेण वेदे विविधप्रकारस्य लोपः, आगमः वर्णविकारश्च परिलक्ष्यते। ये तावत् व्याकरणम् अध्ययनं न कृतवन्तः, ते खलु लौकिक-वैदिकप्रयोगस्थले आकार-प्रकारगतभेदाः वोद्धुमअशक्यः भूत्वा वैदिकशब्दम् अशुद्धमिति अनुचिन्त्य शोधयितुं प्रवृत्तिः सन्तः वैदिकशब्दस्य स्थले लौकिकशब्दस्य प्रयोगः करिष्यन्ति। फलतः वेदवाक्यस्य आनुपूर्विकत्वस्य विपरिणामत्वात् वेदस्य वेदत्वं नङ्क्ष्यति, वेदमन्त्रपाठाच्च अभीष्टा फलप्राप्तिः न भविष्यति। परन्तु यः किल व्याकरणम् अध्ययनं कृतवान्, तस्य ईदृश-विस्मरणस्य सम्भावना नास्ति।अतः लोप आगम-वर्णविकाराणाञ्च स्वरूपं विज्ञाय अर्थबोधेन सह वेदपाठे कृते वेदस्य यथायथं रक्षा भवति। महाभाष्ये पतञ्जलिना तदभिहितम्- 'रक्षार्थं वेदानाम् अध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति' इति।

मीमांसकगणस्तु वेदरक्षार्थं व्याकरण शास्त्रस्य प्रयोजनं न स्वीकरोति। ते वदन्ति शिष्याचार्य्यसम्वन्धरेव वेदरक्षायाः हेतुः। तदुक्तं तन्त्रवार्त्तिके कुमारिलभट्टेन- "शिष्याचार्यसम्बन्धो हि महान् वेदरक्षा हेतुर्व्याकरणानधीनस्यापि वेदक्रमस्याध्ययनेनैव रक्ष्यमाणत्वात्" इति। अभिमतमिदं तु कदापि त समर्थनयोग्यम्। 'ईश्वरो विचरितोः'- इति वैदिकप्रयोगे 'विचरितोः' इति पदम् "ईश्वरे तोसुन् कसुनौ" (अष्टाध्यायी 3/4/13) इति पाणिनीयसूत्रेण निष्पन्नं जातम्। ईदृशपदस्य साधुत्वं लोकतः न सिध्यते। एतदर्थं कात्यायन- पतञ्जलिमुद्वयं च कथयति यत्, वेदरक्षार्थं व्याकरणज्ञानम् आवश्यकम्। नचेत् मन्त्रसमूहः कालक्रमं विकारप्राप्तो भवेत्।

**2. ऊहः (conjecture or Supplying of ellipses)-** ऊहोऽस्ति व्याकरणशास्त्रस्य द्वितीयं मुख्यप्रयोजनम्। कस्तावत् ऊहः? वाक्यमध्ये अकथितपदस्य योजना हि ऊहोऽध्याहारः वा। "न्यनपूरणार्थमधिकोपादानमध्याहारः। युक्तिप्राप्तस्यार्थस्य व्यक्तीकरणमध्याहारः इति साङ्यः"- अमरकोषटीका। वस्तुतः वैदिकशब्दानां तत्देवतालिङ्गाद्यनुसारं लिङ्ग-वचन-पुरुषानां यथायथं विपरिणामस्य नाम ऊहः। वेदे प्रकृति-विकृतिभेदेन यागसमूहो द्विविधो भवति। मीमांसाशास्त्रे उक्तम्- 'प्रकृतिवद् विकृतिं कुर्य्यात्'। तदनुसारेण दर्श-पौर्णमासयागस्य एका देवता अस्ति अग्निः, यः किल मूलयागस्य प्रकृतियागस्य वा देवता। यागकाले अग्निमुद्दिश्य 'अग्न्ये जुष्टम्' (तै.सं. 1/1/4) इति पठ्यते। अस्य आग्नेययागस्य विकृतियागः अङ्गयागः वा अस्ति सौर्ययागः। विकृतियागस्य देवता सूर्यत्वात् अग्निपदस्य स्थले सूर्यपदम् उपवेशयन् तत्र चतुर्थीविभक्तीं युञ्जीत। यथा- सूर्याय युष्टमिति। सायणाचार्य्येनापि ऋग्वेदस्य उपोद्घातप्रकरणे उक्तम्- "प्रकृतौ आम्नतस्य मन्त्रस्य विकृतौ समवेतार्थत्वाय तदुचितपदान्तरस्य प्रक्षेपेण पाठ ऊहः। तद्यया- अन्वेनं माता मन्यतामनु पिताऽनु भ्राता इति प्राकृतपुशुविषयो मन्त्रपाठस्तस्य च मन्त्रस्य विकृतौ पशुद्धये सति अन्वेनौ माता मन्यतामित्यूहः। पशुवहुत्वे सति अन्वेनान् माता मन्यतामित्यूहः कर्त्तव्यः।"

यत्र साक्षात्रूपेण यागकार्ये विनियोगार्थं मन्त्रः न पठितः, तत्र ऊहकार्येण मन्त्रशरीरं कल्पित्वा विनियोगो बोधितो भवति। विशेषतया तत्र व्याकरणस्य साहाय्यम् अन्तरेण लिङ्ग-वचन-विभक्तिप्रभृतीनां यथायथं विपरिणामो न शक्यः। तस्मात् व्याकरणं वेदस्य साक्षात् उपकारको भवति। तेन पतञ्जलिना उक्तम् ऊहकार्यविषये- "न सर्वलिंगैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं

विपरिणमयितव्याः। तान्न वैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।"

**3. आगमः (Scripture)** - व्याकरणशास्त्रस्य तृतीय-मुख्यप्रयोजनरूपेण आगमः उपन्यस्तो भवति। आगम शब्दस्य अर्थोऽस्ति शास्त्रम्, विशेषतया श्रुतिः वेदः वा स्मृतिश्च मन्वादिप्रणीतं धर्मशास्त्रं वा आगमशब्देन निर्देशः क्रियते। तदुक्तं हि पाणिनिदर्शनस्य वासुदेवशास्त्रिकृतायां टीकायाम्- "आगमः... श्रुतिरेषेति हरदत्तादयः। स्मृतिरिति तु भट्टाचार्य्या। तन्मत आगमपदेनागममूलकत्वात् स्मृतेरपि ग्रहणं बोध्यम्।" आगमपाठार्थं व्याकरणशास्त्रम् अध्येयम्। वेदरक्षा-आगमरक्षयोश्च मध्ये विशेषः किञ्चित्-पृथकत्वं नास्ति। वस्तुतः शास्त्रस्य शुद्धाशुद्ध विषयो व्याकरणेन एव निरुप्यते। वेदम् निगद्यते अखिलधर्मस्य मूलम्-- 'वेदोऽखिलो धर्ममूलम्' (मनुसंहिता 2/6)। अस्मात् अखिलधर्ममूलात् वेदादपि व्याकरणशास्त्रं समाधिकं पवित्रं मन्यते। तथाहि वेयाकरणभर्तृहरेः स्वोपज्ञवृत्तौ प्रमाणरूपेण अप्रमत्तगीतश्लोकोऽयम् उद्धृतोऽस्ति --

**"आपः पवित्रं परमं पृथिव्यामपां पवित्र परमं च मन्त्राः।**

**तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः।।"**

व्याक्यपदीयेऽपि उक्तम्- 'पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।" छान्दोग्योपनिषदः "वेदानां वेदम्" इति वाक्यांशे भाष्यकारेण शंकराचार्य्येण अभिहीतम्-"वेदानां वेदं व्याकरणम्-इत्यर्थः। व्याकरणेन हि पदादिविभागशः ऋग्वेदादयो ज्ञायन्ते।"

अतः प्राधान्येन वेदरक्षार्थं शास्त्ररूपेण आगमरूपेण वा व्याकरणम् अवश्यम् अध्येयम्। यतः शिक्षा-कल्पादिषट्सु अङ्गेषु व्याकरणं प्रधानम्।

महाभाष्यकारेणापि उक्तं शास्त्रवाक्यं मेकम्- "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्ययो ज्ञेयश्च" इति। उच्यते यत, श्रौतादेशःलघने कृते सति पापं भवति। अतः श्रौतादेशलङ्घनजनितः प्रत्यवायः परिहारस्य कृते षडङ्गवेदाध्ययनकर्तव्यत्वत् व्याकरणाध्ययनमपि मुख्यप्रयोजनरूपेण उपन्यस्तमस्ति। अत एव षडङ्गवेदाध्ययनं सन्ध्यावन्दनादिवत् नित्यं कर्तव्यम्। यथा, श्रुतौ उक्तम्- 'अहरहः सन्ध्यामुपासीत'। किं नित्यकर्म? अस्य च किं तावत् प्रयोजनम्- "नित्यानि-अकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि। ... एतेषां नित्यादीनां वुद्धिशुद्धिः परं प्रयोजनम्" इति वेदान्तसारम्। प्रयोजनशब्देन हि प्रयोजकं फलं चोच्यते। तत्र आगमोऽस्ति प्रयोजकरूपं प्रेरकरूपं वा "प्रयोजनम्। यतः आगमः अर्थात् शास्त्रं निशम्य मनुष्यानां व्याकरणाध्ययने प्रवृत्तिः भवति। अतः आगमः व्याकरणस्य प्रवर्त्तकः। सैव च प्रवृत्तित्वात् रक्षादीनि अपराणि चत्वारि प्रयोजनानि स्वत - साधितत्वात् तान्येव आगमस्य फलरूपप्रयोजनम्।

**4.लघुता (Simplification) -** इयमस्ति व्याकरणस्य चतुर्थं मुख्यप्रयोजनम् लघुशब्दस्य बहवा अर्थाः सन्ति। किन्तु इह शब्दशिक्षार्थम् अनायाससाध्योपायग्रहणं हि लघुः। अर्थात् इह अल्पार्थे लघुशब्दः गृहीतः। 'अनन्तपारं किल शब्दशास्त्रम्' अर्थात् शब्दराशिः अनन्तरेवास्ति। तेन, प्रतिशब्दं पृथक् पृथग्रूपेण अधीत्य कृत्स्नशब्दस्य ज्ञानप्राप्तिः सम्पूर्णतयैव अशक्या। एतत्प्रसगे पतञ्जलिना अर्थवादवाक्यमेकम् उक्तम्- 'एवं हि श्रुयते'- वृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम।" तत्र हि मनुष्यप्यनाम् आयुः अतीव अल्पः, यत्र इन्द्रो दिव्यं वर्षसहस्रं प्रतिपदं पठित्वा न समापनं कर्तुं शक्नोति। अत एव व्याकरणेन सामान्य-विशेषात्मकनियमं ग्रहणे कृते सति प्रतिपदपाठापेक्षया अतीव अल्पप्रयत्नेन एव महती महती शब्दराशिः ज्ञातुं शक्यते। सामान्यतः सामान्यलक्षणसूत्रेण अहोस्वित् उत्सर्गविधिना तत्विषये भाषायाः शब्दशतस्य मध्ये अशीत्याः नवतिः शब्दाः अनायासेन शुद्धतया ज्ञातुं शक्यन्ते। सामान्यनियमाच्च वहिः यात्सर्वान् शब्दान् दृश्यते तेषां कृते विशेषनियम उत अपवादविधिः कर्तव्या। तदुक्तं महाभाष्यकृता- "सामान्येनोत्सर्गः कर्तव्यः। त यथा- "कर्मण्यण्" (3/2/1)। तस्य विशेषेणापवादः। तद्यया- "आतोऽनुपसर्गे कः" (3/2/3)। सामान्यविधिः यथा- "कर्मण्यण्" (3/2/1) अर्थात् कर्मोपपदपूर्वकात् धातोः परः कर्तृवाच्ये अण् प्रत्ययः स्यात्। यथा- कुम्भं करोति यः स कुम्भकारः, वेदमधीते यः स वेदाध्यायः, सूत्रं करोति यः सः सूत्रकारः, ग्रन्थं करोति यः स ग्रन्थकारः एवम्प्रकारेण वहवः शब्दाः ज्ञातुं शक्यन्ते। किन्तु "आतोऽनुपसर्गे कः" (3/2/3) इति विशेषसूत्रेण उक्तम्- कर्मोपपदपूर्वकात् आकारान्तधातोः परः कर्तृवाच्ये क-प्रत्ययः स्यात्। यथा- गां ददाति यः स गोदः, सर्वं जानाति यः स सर्वज्ञः, धनं ददति यः स धनदः इत्यादि। सूत्रमिदम् आकारान्तधातोः विषये विशेषविधिः।

"आतोऽनुपसर्गे- "इति विशेषसूत्रं सामान्यसूत्रस्य वाधकः सम्भूतः। एतत्सूत्रस्य च कार्यक्षेत्रंमपि सामान्यसूत्रवत् न हि बहुविस्तारितमस्ति। तदपेक्षाया वहुसंक्षिप्तं जातम्। यतो हि 'कर्मण्यण्' इति सामान्यसूत्रेण सर्वधातोः परः अण्-प्रत्ययप्रसङ्गत्वात् आ-कारान्तधातोः परोऽपि अण्-प्रत्ययस्य प्राप्तिः अभवत्। परन्तु 'आतोऽनुपसर्गे कः'- इति विशेषसूत्रम् आकारान्तधातोत्तरं क-प्रत्ययस्य विधाने कृते सति आ-कारान्तधातोत्तरं प्राप्तः अण्-प्रत्ययः बाधितं गतम्। फलतः तत्र पुनः अण्-प्रत्ययः न जातः। एतस्य कृते विशेषसूत्रं सामान्यसूत्रस्य वाधकः कथ्यते। 'आतोऽनुपसर्गे-' इति विशेषसूत्रेण अन्नद-धनदादयः भुरिशः शब्दाः ज्ञातुं शक्याः। एवम्प्रकारेण लघुनोपायस्य कृते सामान्य-विशेषसूत्रयोः प्रवर्तने कृते व्याकरणेन अल्पायासेन साधुशब्दराशेः ज्ञानप्राप्तिः भवितुमर्हति, यत् प्रतिपदपाठेन अशक्यः।

**5. असन्देहः (removal of doubts)-** व्याकरणस्य पञ्चमम् अन्तिमं वा मुख्यप्रयोजनमस्ति असन्देहः। असन्देहशब्दस्यार्थः सन्देहस्य अभावः। महाभाष्यकारेण अभिहितं ब्राह्मणवाक्यमेकं पस्पशाह्निक-'याज्ञिकाःपठन्ति- "स्थूलपृषतीमाग्निवारुणीमनड्वाही-मालभेत" अर्थात् अग्निवरुणदेवताभ्यां स्थूलपृषतीम् अनङ्वाहीम् धेनुम् आलभेत इत्यर्थः। अस्य व्याकयस्य द्वितीयान्तं 'स्थूलपृषतीम्' इति पदमधिकृत्य सन्देहस्य उत्पत्तिः सञ्जाता। 'स्थूलपृषतीमि' ति एकं समासवद्धपदम्। अस्य पदस्यार्थः सम्यक् न विज्ञाय यज्ञकर्मणि

प्रवृत्तो सति तस्मात् यज्ञकर्मणः अभीष्टफलं न लभ्यते। 'स्थूला चासौ पृषती च' इति विग्रहेन 'स्थूलपृषतो' इति कर्मधारयः (तत्पुरुषः) समासः। 'समासस्य' (6/1/223) चेति सूत्रेण तत्र अन्तस्वर उदात्त जातः। पुनश्च 'स्थूलानि पृषन्ति यस्याः सा' इति विग्रहेन स्थूलपृष। नीति बहुव्रीहिसमासः। तत्र च 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6/2/1) इति सूत्रेण स्थूलेति पूर्वपदस्य प्रकृतिस्वरः। अतएव 'स्थूलपृषतीम्' इति पदे कर्मधारय-बहुव्रीहिसमासयोश्च मध्ये सन्दहे वैयाकरणः तत्पदे पूर्वपदम् अन्तोदात्तमिति अवलोक्य बहुव्रीहिरेव निश्चितं कृतवान्। तस्मात् ईदृशय वहवे सन्देहदूरीकरणाय अर्थात् असन्देहार्थम् अवश्यमेव शब्दशास्त्रं व्याकरणं वा पठनीयम्।

**6. तेऽसुराः-** तेऽसुरा इति शास्त्रवाक्यादेव व्याकरणशास्त्रस्य गौणप्रयोजनानि आरभ्यन्ते। प्रयोजनमिदमस्ति व्याकरणशास्त्रस्य प्रथमं गौणप्रयोजनं तथा षष्ठप्रयोजनम्। 'तेऽसुराः' इत्यादिशास्त्रवाक्यं शतपथब्राह्मणात् (3/2/1/23) उद्धृतं ज्ञातम्। तत्रोच्यते- "तेऽसुरा आप्तकामा हेलवो हेलव इति वदन्तः परावभूवुः। तस्माद् ब्राह्मणो न म्लेच्छेत्"। वस्तुतः असुराः 'हे अरयः' 'हे अरयः'- इत्येवं वक्तुम् इच्छन् वाग्-इन्द्रियस्य वैकल्यवशात् 'अरयरि' ति पदस्य 'र' स्थले 'ल' उच्चारणं 'य' कारस्य च स्थले 'व' उच्चारणं कृतवन्तः। एवं प्रकारेण अपशब्दस्य प्रयोगत्वात् ते असुराः पराबभूवुः।

महर्षेः पाणिनेः "हैहे प्रयोगे हैहयोः" (8/2/85) इति सूत्रस्यार्थोस्ति-- है-शब्दयोगे हे-शब्दयोगे च है-शब्द हे-शब्दौ च प्लुतोदात्तो स्यात्। यथा, हे³ राम। कृष्ण है³। अत एव 'हे अरयः' इत्यस्य 'हे' प्लुतोदात्तो भवति। हे-शब्दात् परं अवर्णत्वात् 'प्लुतप्रगृह्या अचि नित्यम्' (6/1/125) इति सूत्रेण प्लुतस्य प्रकृतिभावं भवति। प्रकृतिभाववशात् 'हे³ अरयः' इत्येवं साधुः प्रयोगो भवेत्। किन्तु ते एव असुराः प्रकृतिभावं न कृत्वा सन्धिं युक्त्वा उच्चारणस्य कृते 'हेलयः हेलयः' ऊदुः। एवंविधम् उच्चारणम् अस्ति अपभाषणम्। भाषायाम् अपशब्दस्यप्रयोगे सति प्रकृतार्थग्रहणे मनुष्यगणः व्यर्थो भवेत्। अतः भाषायाम् अपशब्दस्य प्रयोगनिवारणार्थमेव पतञ्जलिना 'तेऽसुरा' इति प्रयोजनमुक्तम्।

**7. दुष्टः शब्दः--** इदं व्याकरणशास्त्रस्य द्वितीयं गौणप्रयोजनं तथा सप्तमप्रयोजनम्। 'तेऽसुराः' इति शास्त्रवाक्ये वर्णापराधस्य फलम् उक्त्वा अधुना स्वरापराधस्य फलं दर्शयितुं भाष्यकारेण उक्तम्--

**"दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।"**

तैत्तिरीयसंहितायाः द्वितीयकाण्डस्थे पञ्चमप्रपाठके विश्वरूपसम्बन्धे या आख्यायिका वर्तते, तस्याः तात्पर्य्यप्रसङ्गे 'दुष्टः शब्दरि'ति शास्त्रवाक्यं प्रणीतम्। शतपथब्राह्मणेऽपि आख्यायिकेयं दृश्यते।
वस्तुतः वेदाध्ययने स्वरज्ञानम् अत्यावश्यकमस्ति। स्वरज्ञानाभावात् अस्माभिः कदापि दुष्टः शब्दः अशुद्धशब्दो वा न प्रयुज्येत। तस्मात् 'दुष्टः शब्दः' इति प्रयोजनमुक्तम्।

**8. यदधीतम् --** व्याकरणस्य तृतीयं गौणप्रयोजनं तथा अष्टमप्रयोजनम्। न केवलं मन्त्रपाठः करणीयः। तस्य मन्त्रस्य अर्थं ज्ञात्वैव मन्त्रपाठः कर्तव्यः। अर्थज्ञानम् अन्तरेण मन्त्रपाठो वेदपाठो वा अनर्थकं भवति। व्याकरणं विना शास्त्रर्थज्ञानं न लभ्यते। एतदर्थं पतञ्जलिना उक्तमेकं शास्त्रवाक्यम्-

**"यदधीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्राविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।"**

इह अनर्थकाध्ययनं परिहारार्थं यदधीतमिति प्रयोजनमुक्तम्।

**9. यस्तु प्रयुक्ते--** इदं व्याकरणस्य चतुर्थं गौणप्रयोजनं तथा नवमप्रयोजनम्। शब्दापशब्दयोः प्रयोगे धर्माधर्मयोः निरुपयितुं महाभाष्यकारेण कात्यायनप्रणीतं भ्राजाख्यमेकं श्लोकम् उपन्यस्तम्-

**"यस्तु प्रयुक्ते कुशलो विशेषे शब्दान् यथाव व्यवहारकाले।**
**सोऽनन्तमाप्नोति जयं परत्र वाग्योगवि दुष्यति चापशब्दैः।।"**

वस्तुतः यथायथम् अर्थं विज्ञाय शब्दप्रयोगजतं नैपुण्यम् अर्जनस्य कृते 'यस्तु प्रयुङ्क्ते' इति प्रयोजनमुक्तम। सामान्यतः कात्यायनप्रणीतस्य श्लोकस्य मूले वर्तते श्रुतिवाव्यमिदं-- एकः शब्दः सम्यग्ज्ञातः शस्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति'।

**10. अविद्वांसः-** इदं व्याकरणस्य पञ्चमं गौणप्रयोजनं तथा दशमप्रयोजनम्। अभिवादन- प्रत्यभिवादनार्थं व्याकरणशास्त्रस्य अन्तर्गतः स्वरज्ञानमपि परमं प्रयोजनम्। ये तावत व्याकरणानुसारेण अभिवादन-प्रत्यभिवादनरीती न जानान्ति तैव अविद्वांसः। अतः अभिवादन-प्रत्यभिवादनकाले स्वरज्ञानस्य नियमप्रसङ्गे 'अविद्वांसः' इति प्रयोजनमुक्तम्।

**11. विभक्तिं कुर्वन्ति-** इत्यनेन व्याकरणस्य षष्ठं गौणप्रयोजनं तथा एकादशप्रयोजनम् उच्यते। प्रयाजयागे विविधाः विभक्तयः प्रयोगस्य आवश्यकत्वं लक्ष्यते। व्याकरणस्य ज्ञानं विना ताः सम्यग् न कर्तुं शक्यते। तदुक्तं महाभाष्यकारेण- 'याज्ञिकाः पठन्ति "प्रयाजाः सर्वभक्तिकाः कार्याः" इति। न चान्तरेण व्याकरणं प्रयाजाः स विभक्तिकाः शक्याः कर्तुम्।' वस्तुतः प्रयाजानुयाजेषु समुचितप्रकारेण विविधविभक्तिप्रयोगस्य कृते 'विभक्तिं' कुर्वन्ति इति प्रयोजनमुक्तम।

**12. यो वा इमाम-** इदं व्याकरणस्य सप्तमं गौणप्रयोजनं तथा दाद्वशप्रयोजनम्। व्याकरणज्ञानम् अन्तरेण याजक-यजमानयोश्च यज्ञीयकर्म सम्पादनस्य योग्यता न भवति- एतत् दर्शयितुं पत्ञ्जलिना उक्तम्- "यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विद्धाति स आर्त्विजीनो भवति। आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम्"। वस्तुतः वेदार्थं बोद्धुं आत्विजी नः च भवितुं व्याकरणाध्ययनं कर्तव्यम्।

**13. चत्वारि-** इत्यनेन शब्दानुशासनस्य अष्टमम् आनुषङ्गिकं प्रयोजनं तथा त्रयोदशप्रयोजनम् उच्यते। भाषायाः पदादिज्ञानस्य आवश्यकता दर्शयितुं फणिपतिपतञ्जलिना ऋग्वेदात् शब्दब्रह्मणः प्रतिपादकः निम्नलिखितो मन्त्रो निगदितः --

**"चत्वारि शृङ्गा त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।।"**

(4/58/3)

शब्दस्य स्वरुपविषये अपरेऽपि वदति-

**"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।**

**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।"**

वस्तुतः शब्दस्य सर्वाविधस्वरूपज्ञानार्थं 'चत्वारि' इति प्रयोजनमुक्तम्।

**14. उत त्वः-** इदं व्याकरणस्य नवमं गौणप्रयोजनं तथा चतुर्दशप्रोयजनम्। पतञ्जलिना उक्तम्-

**"उत त्वः पश्यन्न ददर्श वाचमुत त्व शृण्वन्न शृणोत्येनाम्।**

**उतो त्वस्मै तन्वं विसह्र जायेव पत्य उशती सुवासाः।।**

(10/7/14)

वस्तुतः वाचः शब्दस्य वा स्वरूपं सम्यक् ज्ञातुं व्याकरणाध्ययनं कर्तव्यम्।

**15. सक्तुमिव-** इदं शब्दानुशासनस्य दशमं गौणप्रयोजनं तथा पञ्चदशप्रयोजनम्। शब्दापशब्दयोः मध्ये वैयाकरणगणः केवलं शब्दम् अर्थात् साधुशब्दमेव गृह्णीते। साधुशब्दप्रयोगाच्च तत्र मङ्गलमय्याः लक्ष्म्याः सद्भावो दर्शयितुं पतञ्जलिना भणितम्-

**"सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।**

**अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीनिहिताधि वाचि।।"**

वस्तुतः पदे वाक्ये च सततं सुशब्दप्रयोगस्य कृते 'सुक्तुमिव' इति प्रयोजनमुक्तम्।

**16. सारस्वतीम्-** इदं शब्दानुशासनस्य एकादशम् गौणप्रयोजनम् तथा षोडशप्रयोजनम् 'सारस्वतीम्' इत्यनेन पतञ्जलिना शास्त्रवाक्यमेकं भणितम्- "आहिताग्निरपशब्दं पर्युज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वेपेद्" इति।

वस्तुतः अवैयाकरणाः व्याकरणज्ञानरहितत्वात् अपशब्दप्रयोगात् पापकार्य्यं कुर्वन्ति। तेषाञ्च तत्पापात् परित्राणार्थं प्रायश्चित्तं कर्तुं भवति। अतः अपशब्दप्रायोगनिवारणार्थ 'सारस्वतीम्' इति प्रयोजनमुक्तम।

**17. दशम्यां पुत्रस्य-** इदं व्याकरणशास्त्रस्य द्वादशं गोणप्रयोजनम् तथा सप्तदशप्रयोजनम्। प्रशस्तनामकरणविषये व्याकरणज्ञानस्य आवश्यकता दर्शयितुं महाभाष्ये महर्षिपतञ्जलिना अभिहितमेकं शास्त्रवचनम्- "दशम्युत्ताकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तस्तःस्यमवृद्धं त्रिपुरुषानकमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति। द्वाक्षरे चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्" इति।

वस्तुतः घोषाघोषकृत्तद्धितादिकं विज्ञातुम् 'दशम्यां पुत्रस्य' इति प्रयोजनमुक्तम।

**18. सुदेवो असि-** एतत् हि शब्दानुशासनस्य व्याकरणशास्त्रस्य वा त्रयोदशं गौणप्रायोजनं तथा अन्तिम प्रयोजनम् अष्टादशप्रायोजनं वा वाक्यस्थस्य सर्वविभक्त्यन्तपदस्य सम्यगुच्चरणेन वाचिक-पापपरिहारः तच्चफले स्वर्गप्राप्तिं दर्शयितुं महाभाष्यकारेण लिखितमस्ति--

**"सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।**

**अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव।।"**

अत्र दृष्टान्तः- अग्निः यथा उबहुल-लौह प्रतिमायाः मध्ये प्रविश्य तत्रत्यः मलः प्रतिमां शुद्धीकरोति तथैव विभक्त्यन्ताः बहवः शब्दारपि ताल्वादिस्थानभ्यः निःसृतः सन् नः वाचिकपापम् अपाकुर्वन्ति। अतः स्वर्गप्राप्तिरूपफलार्थं व्याकरणाध्ययनम् कर्तव्यम्।

महर्षिवररुचिः कात्यायनः वा भगवान् पतञ्जलिश्च व्याकरणशास्त्रस्य यानि प्रयोजनानि उक्तवान् तेषु आगमो यथा व्याकरणाध्ययनस्य प्रवर्तकः, तथैव 'तेऽसुराः' इत्यादीनि त्रयोदश शास्त्रवाक्यानि अपि व्याकरणाध्ययनस्य प्रवर्तकं प्रयोजकरूपं वा प्रयोजनम्। परन्तु रक्षादीनि अर्थात् रक्षा-ऊह-लघू-सन्देहाश्चेति चत्वारि सन्ति व्याकरणस्य फलरूपप्रयोजनानि। पुनश्च पाणिनिदर्शने उक्तम्- 'व्याकरणशास्त्रस्य शब्दानुशासनं भवति साक्षात् प्रयोजनम्, पारंपर्येण तु वेदेरक्षादीनि।' पुरा व्याकरणाध्ययनरीतिप्रसगे पतञ्जलिना एवमुक्तम् - पुराकल्प एतदासीत्- संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते तेभ्यस्तत्तत्स्थानकरणानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते। तद्यत्वे न तथा"। वस्तुतः कात्यायन-पतञ्जलिप्रभृतिव्याख्यातृगणः वेदप्रयोजनं विना अपरस्य यत्सर्वप्रयोजनस्य उपदेशः कृतवान्, तानि व्याकरणाध्ययनात् विमुख-अध्येतृगणस्य व्याकरणाध्ययने प्रवृत्तं कारयितुमेव कृतानि।

**परिशीलितग्रन्थसूची-**


1.महाभाष्यम् - पतञ्जलि, मोतिलाल बनारसीदास, 1967

2.पस्पशाह्निकम्- टीकाकारः सम्पादश्च शशिभूषणमिश्रः, वि.एन. पब्लिकेशन्, कोलकाता, प्रथमप्रकाशः, 2018

3.वाक्यपदीयम, पण्डित श्री रघुनाथ शर्मा, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, 1997

4.वैयाकरणभूषणसारः, डा. भीमसेन शास्त्री, राधा प्रेस, गाँधीनगर, दिल्ली, 1992

5.शब्दकौस्तुभः, भट्टोजि दीक्षित (1-3 भाग), चौखम्भा संस्कृत सीरीज ऑफिस, वाराणसी, 1991

6. व्याकरण-दर्शनेर् इतिहास गुरुपदः हालदार, संस्कृत बुक् डिपो, 2006

7.वेदान्तसारः स्वामी अमृतत्वानन्द, उद्बोधन कार्यालय, कलकत्ता, 2016

8.अमरकोष, श्रीमत् गुरूनाथ विद्यानिधि-भट्टाचार्य, संस्कृत पुस्तक भाण्डार, कलिकाता, 1408

9.संस्कृत वनाम वाला व्याकरण - श्रीसत्यरञ्जन वन्द्योपाध्याय, संस्कृत पुस्तक भाण्डार, 2013